ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಳಿ

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು –560003

KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD

Malleshwaram, Bengaluru –560003

2026-27 ರ ಎಸ್ ಎಸ್ ಎಲ್ ಸಿ ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ - 4

S.S.LC. MODEL QUESTION PAPER– 2026-27

ವಿಷಯ– ಪ್ರಥಮ ಭಾಷೆ –ಸಂಸ್ಕೃತ

**SUBJECT:** –First Language – SANSKRIT

प्रथम भाषा – संस्कृतम्

ವಿಷಯ ಸಂಕೇತ – 16S | SUBJECT CODE–16S

ಸಮಯ –3 ಗಂಟೆ 15 ನಿಮಿಷಗಳು | (Time 3Hours 15 Minutes)

ಗರಿಷ್ಠ ಅಂಕಗಳು –100 | Max. Marks –100

---

**ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸೂಚನೆಗಳು**

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
3. ಬಲಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತದೆ.
4. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

**परीक्षार्थीनां सामान्यसूचनाः**

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति।
2. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुसरणीयाः।
3. प्रश्नानाम् अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति।
4. प्रश्नपत्रमुत्तरितुं पठनार्थं निर्धारिताः समयावधिः प्रश्नपत्रस्य उपरिभागे लिखितः अस्ति। पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

I. अधोलिखतेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदताः। तेषु स्मुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत।

6x1=6

1. विपिनम् ' अस्य समानार्थकपदम् इदं भवति।

A) उपवनम् B) काननम्

C) उद्यानम् D) आरामः

2. 'सफलम्' अस्य विरुद्धार्थकपदम् इदं भवति।

A) साफल्यम् B) विफलम्

C) अवफलम् D) सुफलम्

3.. 'राजकुमारः' अस्य स्त्रीलिङ्गरूपम् इदं भवति।

A) राजीकुमारी B) राजसुता

C) राजकुमारी D) राजपुत्री

4. 'ययौ' अत्र एषः लकारः वर्तते।

A) लट्लकारः B) लोट्लकारः

C) लिट्लकारः D) लृट्लकारः

5. 'उपनिषदा' अत्र एषा विभक्तिः अस्ति।

A) सप्तमीविभक्तिः B) द्वितीयाविभक्तिः

C) प्रथमा D) तृतीयातिभक्तिः

6. नद्यः समुद्रे अस्तं गच्छन्ति।रेखाङ्कितपदम् अवलम्ब्य प्रश्नवाक्यं कुरुत ।

A) काः B) कदा

C) कीदृशं D) कस्मै

II. चतुर्थपदम् लिखत । 4x1=4

7. रसरत्नाकरः– नागार्जुनः :: लीलावती –__________

8. विवस्वान् –दिनेश्वरः :: सिंहिकासुतः–__________

9. क्रोधः स्थायीभावः :: भयानकः–____________

10. सुरुचिः – उत्तमः :: सुनीतिः__________

III. एकवाक्येन उत्तरं लिखत। 7x1=7

11. मोक्षप्राप्तिः केन भवति ?

12. दधीचिमहर्षेः आश्रमः कुत्र आसीत् ?

13. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?

14. राजारामस्य पिता कः ?

15. चम्पूविषये प्रसिद्धा अभियुक्तिः का ?

16. के मुहुर्मुहुः परिभवं प्राप्नुवन्ति ?

17. रमणमहर्षेः मातापितरौ कौ ?

IV. द्वित्रैः वाक्यैः उत्तरं लिखत। 4x2=8

18. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

अथवा

जामदग्न्यः किमर्थं कर्णं शशाप?

20. सतां सङ्गः किं किं करोति?

21. कः आयुर्वेदः उच्यते?

IV. सूचनानुसारम् उत्तरं लिखत। 4x2=8

22. सन्धिं विभज्य नाम लिखत।

a) बालस्तत्र b) यस्योभयम्

23. विग्रहवाक्यं विलिख्य समासनाम लिखत।

a) प्रतिदिनम् b) प्राप्तोदकः

अथवा

समासं कृत्वा नाम लिखत ।

a) पतितानि फलानि यस्मात् सः =

b) स्वर्गेण तुल्यः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत।

a) पठते बालकाय लेखनीं यच्छतु ।

b) पत्रं कोशात् उद्घाट्य वाचयति ।

25. प्रयोगं परिवर्तयत।

a) बालकः पाठं पठति।

b) वृक्षः रोहति।

VI. संस्कृतभाषया अनुवादं कुरुत। 1x2=2

26. ನದಿಗಳು ಸಾಮಾನ್ಯವಾಗಿ ಪರ್ವತಗಳಲ್ಲಿ ಹುಟ್ಟುತ್ತವೆ.ಅವುಗಳಲ್ಲಿ ಕೆಲವು ನದಿಗಳಿಗೆ ಸಮುದ್ರಸಂಗಮವಾಗುತ್ತದೆ. Rivers generally originate in mountains. Some of them join the sea.

VII. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत। 1x2=2

27.मैसूरुनगरं सांस्कृतिकनगरम् इति प्रसिद्धम् अस्ति। तं द्रष्टुं देशविदेशेभ्यः जनाः आगच्छन्ति।

VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत। 4x3=12

28. किं भवेत् ? मम समीपे ।

कः पाठः? कः अवदत् ? कम् अवदत् ?

29. संस्कृतेनैव संस्कृतिरपि सुरक्षिता।

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

30. ममाप्यस्ति कौतूहलं एनं वृत्तान्तं श्रोतुम्।

कः पाठः ? कः अवदत् ? कस्य वृत्तान्तः ?

31. रसे गन्धे न रज्यते।

कः पाठः? कः अवदत् ? कः न रज्यते ?

अथवा

जग्राह सहसा रविम्।

कः पाठः? कः अवदत् ? कम् अवदत् ?

IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत। 2x3=6

32. विद्वान्. एच.वि.नागराजराव्।

33. वेदव्यासः ।

X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया आङ्ग्लभाषया वा लिखत। 3X3 = 9

34. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।

तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।

35. यत्र कुत्र वा वयं समग्रभारते स्थिता भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।

आदितश्च मध्यतस्तथान्ततश्च भारता भारतीयभावनेति वृद्धिमेतु भारते।।

36. एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः ।

रुरोद शिशुरत्यर्थ शिशुः शरवणे यथा ।।

अथवा

ततं तन्त्रीगतं ज्ञेयम् अवनद्धं तु पौष्करम्।

घनस्तु तालो विज्ञेयः सुषिरो वंश एव च ॥

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं समन्वयत। 1X3 = 3

37. कमलमिव चारु वदनम् ।

अथवा

माघे मेघे गतं वयः।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत। 1X3 = 3

38. मातेव रक्षति पितेव हिते नियुक्ते ।

XIII. पद्यं पूरयत। 1X4 = 4

39. न चोरहार्यं ______________________

________________________________

________________________________

________________________ सर्वधनप्रधानम् ॥

XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत। 3X4 = 12

40. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः? विवृणुत।

अथवा

डा। सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत।

41. पाठयभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत।

42. अमरनावग्रहाविषये का पुराणकथा अस्ति?

XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत। 4X1 = 4

43. जगति सर्वेषां प्राणिनां जीवनाधिकारः वर्तते । मानवः यद्यपि बुद्धिशक्त्या सर्वश्रेष्ठः। 'अहिंसा परमो धर्मः' 'दयैव मूलं धर्मस्य' इति घोषितं धर्मसंस्थापकैः । दुर्दैवात् मानवः प्राणिषु सदा न दयापरः । सः आहारार्थं चर्मार्थं विनोदार्थम् अपि जन्तून् हन्ति । हले शकटे वा युक्ताः बलीवर्दाः अश्वाश्च वोढुम् अशक्यं भारं वहन्तः दृश्यन्ते। शकटपालकः तान् चोदयितुं निर्दयं कशाघातं करोति । एतत् दृष्ट्वा कस्य नयने अश्रुपूर्णे न भवतः ? प्राणिषु सर्वेषु दया दर्शनीया । 'आत्मनः प्रतिकूलानि परेषां न समाचरेत्' इति आर्योक्तिः सदा संस्मरणीया ।

प्रश्नाः –

(1) मानवः कया सर्वश्रेष्ठः भवति ?

(2) धर्मसंस्थापकैः किमिति घोषितम् ?

(3) मानवः किमर्थं जन्तून् हन्ति ?

(4) दया विषये का आर्योक्तिः प्रसिद्धा ?

XVI. पत्रं लिखत। 1X5 = 5

44. मैसूरुमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः / छात्रा इति भावयित्वा अग्रजस्य विवाहार्थं दिनद्वयं विरामं संप्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत।

अथवा

प्रवासार्थ धनं प्रेषयितुं निवेद्य पितरं प्रति पत्रं लिखत।

XVII. दशवाक्यैः प्रबन्धं लिखत।

45. परिसरः अथवा दूरदर्शनम् ।